उपसंहार

## उपसंहारः

"परिभाषेन्दुशेखरस्य विजयाभूति टीकयोः कतिपयविशिष्टस्थलानां तुलनात्मक-मध्ययनम्" इति विषयमाधारीकृत्य कृतं शोधकार्यं मया । नूनं विषयोऽयं गभीरतरः । एकन्तु परिभाषेन्दुशेखर पुस्तकमेव कठिनं प्रौढ पाण्डित्य सापेक्ष त्वान्येयं तदुपरिभूति विजया टीकयो स्तुलनात्मकं पर्यवेक्षणम् । व्याकरण शास्त्रास्या धारस्तम्भोऽयं ग्रन्थः परिभाषेन्दु शेखरनामकः । अत्र समागताः सर्वाः परिभाषाः नूनं व्याकरणशास्त्रोपयोगिन्यः सन्ति । अतः एतस्य तुलापगाहि आलोडनमन्तरा नैवशक्यते किमपिलेखितुमत्र । तत्रा पितत्रटीकयो र्द्वयोः तुलनात्मकं समीक्षणं नूनं कठिनायते । अनयोष्टीकयोरिदंवैशिष्टयं यत् मूलार्थस्य स्पोरपे केवलं स्पर्श मात्र मेवात्र कृतं वर्तते । मूलार्थमपहाय तत्र तत्र समुद्-भाविताः नवीनाः नवीनाः कल्पनाः । समुद्भाविताश्च अभूतपूर्वा परिस्कार शैली । नव्यन्यायशैल्या प्रोद्भावितयं परिष्कार शैली न्यायमार्गे प्रवेशमकृतवतां कृते नितरामेव काठिन्यमावहति । नात्रसन्देहः यत् परिष्कारलेखनस्य नवीन कल्पनोद्भावनस्य वा टीकाकारयोस्तात्पर्यं ग्रन्थस्य मूलार्थविवोधने एवासीत् । यतो हि टीकाकाराणां विचारेण अद्भुतया प्रतिभया च पुस्तकस्यास्य मौलिकं वर्चस्वं नूनं प्रकटितं भवति । नागेशस्यसूक्ष्मेक्षिकाच प्रस्फुटिताभवति । किन्त्वस्मि-न्समये एतादृशं कार्यं श्रमसाध्यं, कष्ट साध्यं वैदुष्य साध्यं चेत्यत्र न मनागपि संशयावसरः ।

एतादृशं गरीयः कार्यमादाय समारब्धं शोधकर्मणि सम्पतिताः नैके प्रत्यवायाः पुरस्तान्मे । न खलु विमनायितयत्र, न वा उत्सृष्टं स्वकीयं कार्यं यद्यपि लग्न लगितो भूयान् समयः परन्तु सम्पादितं कार्य मिदं मयका ।

अस्मिन्पुस्तके प्रकरणत्रयं वर्तते । प्रथमप्रकरणं नाम - ।1। शास्त्रत्व सम्पादनोद्देश्य-नामकं प्रकरणम् - अस्मिन् प्रकरणे यावत्य: परिभाषा: समागता: सन्ति ता: स्वी: शास्त्रत्वं सम्पादयन्ति । शास्त्रत्वसम्पादनमन्तरा द्वितीय प्रकरणस्य बाध्य बाधकभाव बोधनपरायणस्य सार्थक्यं नैव जायेते । यतोहि अस्मिन्प्रकरणे इदमेव निरूपितं वर्तते यत् पूर्वशास्त्रं प्रति परशास्त्रमसिद्धं स्यात्, अन्तरङ्ग शास्त्रं प्रति बहिरङ्ग-मसिद्धं स्यात् । एवं रीत्या एक शास्त्रं प्रति अपरस्यशास्त्रस्यासिद्धत्वं प्रतिपादितम् किन्त्वदंमसिद्धत्वं शास्त्रत्व सम्पादनं विनानैव भवितुमर्हति । एवं च प्रथम प्रकरणस्य द्वितीय प्रकरण सापेक्षतया तस्य प्राथमिकं कथनमौचित्यमेवाचिति । द्वितीय प्रकरणे लक्ष्यधर्मिक साधुत्व प्रकारक बोधजनिका परिभाषा समुट्टङ्किता:, सन्ति । तृतीयप्रकरणे अनयो: प्रकरणयो: अवशिष्टा: परिभाषा वर्तन्ते ।

प्रथमप्रकरणे "कार्यमनुभवन्" "यदागमा" निर्दिश्यमानस्यादेशा भवन्ति" प्रत्ययग्रहणे" "व्यपदेशिवदेकस्मिन्" इत्यादय: प्रमुखा: परिभाषा: सन्ति । आसां परिभाषाणां विवेचनं महता संरम्भेण टीकाकाराभ्यां कृतम् । यन्नतत्र खण्डनमण्डनादिकमपि दृश्यते । मया च यत्र विजयाकारेण भूते: खण्डनं कृतं तद् समुल्लिख्य तत्वप्रकाशिकाकार द्वारा कृतं तत्समर्थन मपि लिखितम् ।

कुत्र चिच्च द्वयोष्टीकयो: प्रतिपादन शैली कीदृशीति सोदाहरणं प्रस्तुतीकृतम् । यथामति कुत्रचित् युक्तायुक्तत्व विनिर्णयोऽपि कृत: । एवं रीत्या कृतो मया प्रयास: क्षोदीयान् । अस्मिन्प्रयासे कियत् साफल्यं लब्धमिति निर्णेतुं गुणैक पक्षपातिनो विद्वांस: एव प्रभव: । अत्रकर्मणियेषांसाहाय्यं मया लब्धं तेषां सर्वेषां कृतज्ञतामावहामि ।